
# लौहतुला

[विष्णुशर्मा द्वारा रचित **पञ्चतन्त्र** नामक कथाग्रन्थ के **मित्रभेद** नामक तन्त्र से यह पाठ संकलि
है। जीर्णधन नामक व्यापारी ने अपनी लोहे की तराजू (लौहतुला) न्यास (धरोहर) के रूप में एक सेठ
पास रखी थी। विदेश से लौटकर जब वह अपनी तराजू सेठ से माँगने गया तो सेठ ने 'उसे चूहे खा ग
कहकर टाल दिया। जीर्णधन ने इस कार्य का बदला सेठ से कैसे लिया–यह इस पाठ में बताया गया है
न्यायालय में समुचित न्याय मिलने से उस व्यापारी को प्रसन्नता हुई।]



एकस्मिन् नगरे जीर्णधनो नाम व्यापारी अवसत्। धनाभावात् स देशान्तरं गन्तुमिच्छ
अचिन्तयत् –यस्मिन् स्थाने मया स्वपुरुषार्थेन भोगाः भुक्ताः तत्र विभवहीनः क
वसामि ? तस्य गृहे परम्परागता लौहतुला आसीत्। तां कस्यचित् श्रेष्ठिनः गृहे निक्षेपरू
दत्त्वा स देशान्तरं गतः। देशान्तरे चिरं स्थित्वा स्वनगरं समागतः जीर्णधनः श्रे
कथितवान्–भोः श्रेष्ठिन् ! मम लौहतुलां देहि। श्रेष्ठी उवाच–भोः नास्ति सा तुला, मूषि
भक्षिता सा।

जीर्णधनः आह–भोः श्रेष्ठिन्! नास्ति तव दोषः, यदि मूषकैः भक्षिता सा। ईदृ

खलु संसारः। अत्र किमपि शाश्वतं नास्ति। परमहं नद्यां स्नातुं गमिष्यामि। त्वं स्वकीयं पुत्रं धनदेवनामकं मया सह स्नानोपकरणानां रक्षणाय प्रेषय इति। ततः स श्रेष्ठी स्वपुत्रं निर्दिष्टवान्–वत्स ! अयं ते पितृव्यः स्नानाय गच्छति, अनेन सह वस्त्रधारणाय त्वं गच्छ।

अथ श्रेष्ठिपुत्रः स्नानोपकरणं नीत्वा अभ्यागतेन सह प्रस्थितः। जीर्णधनः नद्यां स्नात्वा धनदेवं गिरिगुहायां प्रक्षिप्य तस्याः द्वारं पाषाणेन आच्छाद्य गृहमागतः। अथ श्रेष्ठी गृहागतं तं ज्ञात्वा स्वपुत्रविषये जिज्ञासाम् अकरोत्। व्यापारी उवाच–भोः श्रेष्ठिन् ! नदीतटात् स श्येनेन अपहृतः। श्रेष्ठी कुपितः उवाच–रे मिथ्यावादिन् ! किं क्वचित् श्येनो बालकं हर्तुं शक्नोति ? आनय मे बालकम् अन्यथा न्यायालये निवेदयिष्यामि।

व्यापारी अकथयत् –भोः सत्यवादिन्, यथा श्येनो बालकं न अपहरति तथा मूषकाः अपि लौहतुलां न भक्षयन्ति। यदि बालकमिच्छसि, तथा देहि मे तुलाम्। एवं विवदमानौ तौ न्यायालयं गतौ। श्रेष्ठी तत्र तारस्वरेण प्रोवाच–महान् अन्यायः। मम बालकोऽनेन चौरेण अपहृतः। ततः धर्माधिकारिणः ऊचुः –भोः ! समर्पय श्रेष्ठिपुत्रम्। व्यापारी उवाच–किं करोमि ? पश्यतो मे नदीतटात् श्येनेन स अपहृतः। तन्निशम्य धर्माधिकारिणः प्रोचुः–असत्यं त्वया कथ्यते। किं श्येनः बालकं हर्तुं समर्थः ? स आह–

मूषकाः यत्र खादन्ति यदि लौहमयीं तुलाम्।
बालकं च हरेत् श्येनो बुधाः नैवात्र संशयः॥

तेऽकथयन् –कथमेतत् ? ततः स व्यापारी सभ्यानाम् अग्रे आदितः सर्वं वृत्तान्तं निवेदितवान्। ततः ते विहस्य द्वावपि सम्बोध्य तुला–बालक–विनिमयेन सन्तोषितौ।

## शब्दार्थाः

| | | |
|---|---|---|
| देशान्तरम् | – | दूसरे देश, परदेश |
| गन्तुम् | – | जाने के लिए |

| | | |
|---|---|---|
| भुक्ताः | – | भोगे गये |
| कथम् | – | कैसे |
| परम्परागता | – | परम्परा से आई (वंश-परम्परा से प्राप्त) |
| लौहतुला | – | लोहे की तराजू |
| निक्षेपरूपेण | – | धरोहर के रूप में |
| दत्त्वा | – | देकर |
| गतः | – | चला गया |
| चिरम् | – | बहुत समय तक |
| स्थित्वा | – | रह कर |
| देहि | – | दो |
| उवाच | – | कहा |
| भक्षिता | – | खा ली गयी |
| आह | – | कहा |
| ईदृशः | – | इस प्रकार, ऐसा |
| अत्र | – | यहाँ |
| शाश्वतम् | – | चिर स्थायी |
| स्नातुम् | – | नहाने के लिए |
| सह | – | साथ |
| स्नानोपकरणानाम् | – | नहाने की सामग्रियों की |
| रक्षणाय | – | रक्षा के लिए |

| | | |
|---|---|---|
| प्रेषय | – | भेजो |
| ततः | – | तब |
| श्रेष्ठी | – | सेठ |
| वत्सः | – | पुत्र |
| पितृव्यः | – | चाचा |
| धारणाय | – | रखने के लिये |
| नीत्वा | – | लेकर |
| अभ्यागतेन सह | – | आगन्तुक के साथ |
| प्रस्थितः | – | चला गया |
| स्नात्वा | – | नहाकर |
| गिरिगुहायाम् | – | पर्वत की गुफा में |
| प्रक्षिप्य | – | रखकर |
| पाषाणेन | – | पत्थर से |
| आच्छाद्य | – | ढँककर |
| आगतः | – | आ गया |
| ज्ञात्वा | – | जानकर |
| श्येनेन | – | बाज के द्वारा |
| हर्तुम् | – | हरण के लिए |
| शक्नोति | – | समर्थ होता है |
| आनय | – | ले आओ |

| | | |
|---|---|---|
| मूषकाः | – | चूहे |
| अपि | – | भी |
| भक्षयन्ति | – | खाते हैं |
| विवदमानौ | – | झगड़ते हुए (द्विवचन) |
| तारस्वरेण | – | ऊँचे स्वर से |
| चौरेण | – | चोर द्वारा |
| धर्माधिकारिणः | – | न्यायाधीश (बहुवचन) |
| पश्यतः | – | देखते हुए |
| निशम्य | – | सुनकर |
| बुधाः | – | हे बुद्धिमानों |
| सभ्यानाम् | – | सभासदों का |
| अग्रे | – | आगे |
| आदितः | – | प्रारम्भ से |
| वृत्तान्तम् | – | बातें, समाचार, घटना |
| विहस्य | – | हँसकर |
| सम्बोध्य | – | सम्बोधित कर के |
| विनिमयेन | – | अदला-बदली (एक दूसरे से बदलना) से |

**सन्धिविच्छेदः/पदविच्छेदः -**

| | | |
|---|---|---|
| धनाभावात् | – | धन+अभावात् |

| | | |
|---|---|---|
| देशान्तरम् | – | देश+अन्तरम् |
| परम्परागता | – | परम्परा+आगता |
| समागतः | – | सम्+आगतः |
| नास्ति | – | न + अस्ति |
| किमपि | – | किम् + अपि |
| परमहम् | – | परम् + अहम् |
| स्नानोपकरणानाम् | – | स्नान + उपकरणानाम् |
| अभ्यागतेन | – | अभि+आगतेन |
| प्रोवाच | – | प्र+उवाच |
| बालकोऽनेन | – | बालकः+अनेन |
| तन्निशम्य | – | तत्+निशम्य |
| प्रोचुः | – | प्र+ऊचुः |
| नैवात्र | – | न+एव+अत्र |
| तेऽकथयन् | – | ते+अकथयन् |
| कथमेतत् | – | कथम्+एतत् |
| द्वावपि | – | द्वौ+अपि |

**प्रकृति–प्रत्यय–विभागः –**

| | | |
|---|---|---|
| दत्त्वा | = | √दा+क्त्वा |
| गतः | = | √गम्+क्त |

| | | |
|---|---|---|
| स्थित्वा | = | √स्था + क्त्वा |
| समागतः | = | सम्+आ+√गम् + क्त |
| स्नातुम् | = | √स्ना + तुमुन् |
| हर्तुम् | = | √हृ+तुमुन् |
| अपहृतः | = | अप+√हृ+क्त |
| गन्तुम् | = | √गम् +तुमुन् |
| विहस्य | = | वि+√हस् + ल्यप् |
| ज्ञात्वा | = | ज्ञा+क्त्वा |

## अभ्यासः

### (मौखिकः)

1. **एकपदेन उत्तरं वदत—**

(क) जीर्णधनः कः आसीत् ?

(ख) जीर्णधनः कुत्र अवसत् ?

(ग) कः देशान्तरं गतः ?

(घ) जीर्णधनस्य गृहे परम्परागता का आसीत् ?

(ङ) श्रेष्ठिनः पुत्रः कः आसीत् ?

2. **सन्धिविच्छेदं कुरुत**

(क) तेऽकथयन्

(ख) द्वावपि

(ग) नैवात्र

(घ) प्रोचुः

(ङ) तन्निशम्य

3. **प्रकृति-प्रत्यय-विभागं कुरुत –**

दत्त्वा, गत्वा, पठित्वा, हसित्वा, खादित्वा, स्नात्वा, लब्ध्वा, पीत्वा, लिखित्वा, घ्रात्वा, पतित्वा, पृष्ट्वा ।

4. **विपरीतार्थकान् शब्दान् वदत –**

गच्छति, कुपितः, अस्ति, असत्यम्, अन्यायः, विभवयुक्तः, चिरम्

## (लिखितः)

1. **एकपदेन संस्कृतभाषया उत्तराणि लिखत–**

(क) स्नानोपकरणानां रक्षणाय कः अगच्छत् ?

(ख) कस्मात् कारणात् जीर्णधनः देशान्तरम् अगच्छत् ?

(ग) लौहतुला कस्य आसीत् ?

(घ) जीर्णधनः स्नातुं कुत्र गतः ?

(ङ) श्रेष्ठिनः पुत्रस्य नाम किम् आसीत् ?

2. **अधोलिखितानि रेखांकितपदानि बहुवचने परिवर्तयत–**

उदाहरणम्–एकवचने–सः देशान्तरं गतः ।

बहुवचने–ते देशान्तरं गताः ।

(क) सः मम पुत्रः अस्ति ।

(ख) धनदेवः स्नानोपकरणं नीत्वा प्रस्थितः ।

(ग) अत्र दोषः नास्ति ।

(घ) तत्र वृक्षः अस्ति ।

(ङ) वृक्षात् वानरः कूर्दति ।

3. **सुमेलनं कुरुत–**

| | |
|---|---|
| (क) एकस्मिन् | (i) भुक्ता: |
| (ख) भोगा: | (ii) नगरे |
| (ग) परम्परागता | (iii) अपहृत: |
| (घ) श्येनेन | (iv) न्याय: |
| (ङ) महान् | (v) लौहतुला |

4. **पाठानुसारं कोष्ठकात् शब्दं चित्वा रिक्तस्थानानि पूरयत–**

(क) मम ....................देहि। (वस्त्रम्/लौहतुलाम्)

(ख) सा तुला.................भक्षिता। (वानरै:/मूषिकै:)

(ग) जीर्णधन: धनदेवं..............प्रक्षिप्य गृहमागत:। (गिरिगुहायाम्/वने)

(घ) धनदेव: .................श्येनेन अपहृत:। (नदीतटात्/समुद्रतटात्)

(ङ) यदि बालकमिच्छसि, तथा देहि मे ................। (फलम्/तुलाम्)

5. **समानार्थकं पदं चिनुत–**

पुत्र: – जनक:, तनय:, पितृव्य:

गृहम् – सदनम्, दुर्ग:, नगरम्

गिरि: – प्रिय:, मित्रम्, पर्वत:

नदी – सरित्, निर्झर:, प्रवाह:

तारस्वरेण – मधुरस्वरेण, उच्चस्वरेण, वायु:

6. **रिक्तस्थानानि उचितपदेन पूरयत–**

(क) स्नातुम् = √स्ना +...........

(ख) .......... = √गम् + तुमुन्

(ग) पठित्वा = √पद् + ...........

(घ) .......... = √हस् + क्त्वा

(ङ) .......... = $\sqrt{\text{स्ना}}$ + क्त्वा

(च) दत्त्वा = $\sqrt{\text{दा}}$ + ............

(छ) नीत्वा = $\sqrt{\text{नी}}$ + ............

(ज) .......... = $\sqrt{\text{हृ}}$ + तुमुन्

**7. अधोलिखितानां शुद्धकथनानां समक्षं (√) अशुद्धानां च समक्षं (X) इति चिह्नांकनं कुरुत–**

यथा – जीर्णधनः व्यापारी आसीत्। ( )

(क) एकस्मिन् नगरे जीर्णधनो नाम व्यापारी अवसत्। ( )

(ख) तस्य गृहे परम्परागता लता आसीत्। ( )

(ग) अहं नद्यां स्नातुं गमिष्यामि। ( )

(घ) श्रेष्ठी स्वपुत्रविषये जिज्ञासां न अकरोत्। ( )

(ङ) आनय मे बालकम् अन्यथा न्यायालये निवेदयिष्यामि। ( )

## योग्यता-विस्तारः

सरल संस्कृत में नीति की शिक्षा देनेवाले कथा-ग्रन्थों में 'पञ्चतन्त्र' का अत्यधिक महत्त्व है। इसमें विष्णुशर्मा ने एक राजा के तीन मूर्ख पुत्रों को छह मास में राजनीति तथा व्यवहार में कुशल बनाने के लिए कथाएँ कही हैं। इसका विभाजन पाँच खण्डों में किया गया है। इन खण्डों को "तन्त्र" कहा गया है। इससे ग्रन्थ का शीर्षक सार्थक होता है। ये खण्ड (तन्त्र) निम्नलिखित हैं–मित्रभेद, मित्रसम्प्राप्ति, काकोलूकीय, लब्धप्रणाश तथा अपरीक्षितकारक। प्रत्येक तन्त्र में एक मुख्य कथा है जिसके भीतर अनेक अवान्तर कथाएँ हैं। कथाओं को परस्पर ऐसा गूँथा गया है कि एक कथा के अन्त में दूसरी कथा का संकेत हो जाता है। इसका स्वरूप गद्यपद्यात्मक है। कथा गद्य में और नैतिक शिक्षाएँ पद्य में प्रस्तुत हैं।

◆◆◆